# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – वास्तुशास्त्रम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – समराङ्गणसूत्रधारः** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ भूमिजानां विमानानां ब्रूमोलक्ष्म क्रमागतम्।
चतुरश्रीकृतानां च वृत्तानां वृत्त पूर्वशः॥

२ सार्धभागः समुत्सेधः कलशस्य तदर्धतः।
शिखरस्य त्रिभागेन शुकनासा विधीयते॥

३ कनका विकटा देवरम्या च रमणी तथा।
वसुन्धरा तथा हंसी विशाखा नन्दिनीति च॥

४ तलपट्टमधस्तस्या मण्डपस्य निवेशयेत्।
कर्तव्यमेवमग्रेऽग्रे निम्नं निम्नतरं ततः॥

**प्रश्नः २** ग्रन्थानुसारं मण्डपलक्षणानि प्रतिपादयत।

**प्रश्नः ३** लिङ्गपीठप्रतिमालक्षणं ग्रन्थाधारेण स्पष्टयत।

**प्रश्नः ४** भूमिबन्धनविचारः ग्रन्थाधारेण वर्णयत।

**प्रश्नः ५** दोषगुणाध्यायस्य विशदचर्चां कुरुत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ नित्यमस्थितया पुंसामर्थस्य क्षयमादिशेत्।
मयमुन्नतया विद्याद्वृद्रोणं च न संशयः॥

२ नगरेषु सदा कार्यः स्कन्दः परजयैषिभिः।
खेटके तु विधातव्यः षण्मुखो ज्वलनप्रभः॥

३ अङ्गुलीनां नखाः कार्याः सर्वे यर्वार्धसम्मिताः ।
आयाममात्रमेतासां यरीणाहं प्रचक्षते ॥

४ कण्ठो द्वाभ्यामथैकेन वेदिका पुनरुत्तरा ।
एकैकेन तु भागेन ततः स्यात् पीठिकाद्वयम् ॥

प्रश्नः ७ वैष्णवादिस्थानकलक्षणं ग्रन्थोक्तदिशा चर्चयत ।

प्रश्नः ८ पञ्चपुरुषस्त्रीलक्षणानि सविस्तरं वर्णयत ।

प्रश्नः ९ रसदृष्टिलक्षणानि ग्रन्थाधारेण लिखत ।

प्रश्नः १० पताकादिचतुष्षष्टिहस्तलक्षणोपरि निबन्धं लिखत ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ समराङ्गणसूत्रधारस्य रचनाकारः कः ?
२ शाला कतिविधा वर्तते ?
३ सुवर्णं कीदृशं विद्यात् ?
४ पिप्पल्याधातयोः मध्यभागं केन नाम्ना संज्ञितः ?
५ लकारावर्तयोः मध्ये सा कस्य नाम्ना प्रकीर्तिता ?
६ आवर्तं कः प्रचक्षते ?
७ देवानां कति रूपाणि ?
८ चक्रमुत्तीर्णकं केषां रूपस्य नामाभिधानम् ?
९ पुंसां कति रूपाणि ?
१० वामनाः कतिधा ज्ञेया ?
११ मयुरः, कुर्वटः, काशः कस्य नामाभीधानम् ?
१२ हस्ती कतिविधः ?
१३ शोभनादि कति रेखाः सन्ति ?
१४ मण्डपलक्षणानि कति सन्ति ?
१५ पताकादि कति हस्तलक्षणानि वर्तन्ते ?

****